ऋकारांताः स्त्रीलिंगे ईकारांता भवंति.

गंत्री, कर्त्री, पक्त्री, वक्त्री, इत्यादयोगौरीवत्.

स्वसा, याता, ननांदा, दुहिता, इमे ऋकारांता एव, तत्र मात्रादीनां चतुर्णां रूपं निरूपितं.



SGDF

ऋकारांतः स्त्रीलिंगस्स्वसृशब्दः—ಒಡಹುಟ್ಟಿದವಳು

| | | |
|---|---|---|
| स्वसा | स्वसारौ | स्वसारः |
| हे स्वसः | हे स्वसारौ | हे स्वसारः |
| स्वसारं | स्वसारौ | स्वसॄः |

शेषं मातृ शब्दवत्.

सेः पुंवत्, द्यौगौवत्, नौग्लौवत्, राः पुंवत्ः

---

## अथाजंत नपुंसकलिंग विशेषशब्दाः.

अकारांत नपुंसकलिंगो अजर शब्दः.

| | | |
|---|---|---|
| अजरं | अजरे<br>अजरसी | अजराणि<br>अजरांसि |
| हे अजर | हे अजरे<br>हे अजरसी | हे अजराणि<br>हे अजरांसि |
| अजरं<br>अजरसं | अजरे<br>अजरसी | अजराणि<br>अजरांसि |

शेषं निर्जरशब्दवत्.

हृदयशब्दार्थको हृच्छब्दो निरूपित एव.

उदकार्थक उदन् शब्दः आस्यार्थक आशन् शब्दश्च नामन शब्दवत्.

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ E-957



दीर्घांता नपुंसकलिंगे ह्स्वांता भवंति.

| | | |
|---|---|---|
| विश्वपं | विश्वपे | विश्वपानि |

शेषं ज्ञानशब्दवत्.

इकारांत नपुंसकलिंगो दधिशब्दः—ಮೊಸರು

| | | |
|---|---|---|
| दधि | दधिनी | दधीनी |
| हे दधे, हे दधि | हे दधिनी | हे दधीनि |
| दधि | दधिनी | दधीनि |
| दध्ना | दधिभ्यां | दधीभिः |
| दध्ने | दधिभ्यां | दधिभ्यः |
| दध्नः | दधिभ्यां | दधिभ्यः |
| दध्नः | दध्नोः | दध्नां |
| दध्नि, दधिनि | दध्नोः | दधिषु |

एवं अस्थि, सक्थि, अक्षि—इत्यादयः.

इकारांत नपुंसकलिंगस्त्रिशब्दो नित्यंबहुवचनांतः.

त्रीणि, त्रीणि,

शेषं पुंवत्.

प्रधिशब्दो भाषितपुंस्कः; अतस्तस्य तृतीयामारभ्य पुंवत् क्लीबवच्च रूपं.

| | | |
|---|---|---|
| प्रध्या, प्रधिना | प्रधिभ्यां | प्रधिभिः |
| प्रध्ये, प्रधिने | प्रधिभ्यां | प्रधिभ्यः |
| प्रध्यः, प्रधिनः | प्रधिभ्यां | प्रधिभ्यः |
| प्रध्यः / प्रधिनः | प्रध्योः / प्रधिनोः | प्रध्यां / प्रधीनां |
| प्रध्यि / प्रधिनि | प्रध्योः / प्रधिनोः | प्रधिषु |

सुधिशब्दश्च तथा.

| | | |
|---|---|---|
| सुधियम, सुधिना | सुधिभ्यां | सुधिभिः |
| सुधिये, सुधिने | सुधिभ्यां | सुधिभ्यः |
| सुधियः, सुधिनः | सुधिभ्यां | सुधिभ्यः |
| सुधियः / सुधिनः | सुधियोः / सुधिनोः | सुधियां / सुधिनां |
| सुधियि / सुधिनि | सुधियोः / सुधिनोः | सुधिषु |

चित्रगु, प्रद्यु, सुनु, इत्यादयो मधुशब्दवत्.

इकारांत नपुंसकलिंगः प्ररिशब्दः—ಅಧಿಕ ಧನವುಳ್ಳ

| | | |
|---|---|---|
| प्र. प्ररि | परिणी | प्ररीणि |
| तृ. प्ररिणा | प्रराभ्यां | प्रराभिः |
| ष. प्ररिणः | प्ररिणोः | प्ररीणां |
| स. प्ररिणि | प्ररिणोः | प्ररासु |

## अथ हलंतपुल्लिंग विशेषशब्दाः.

चकारांतः पुल्लिंगः प्राक्छब्दः—ಪೂರ್ವದಿಕ್ಕಿನಲ್ಲಿರುವವನು

| | | |
|---|---|---|
| प्राङ् | प्राञ्चौ | प्राञ्चः |
| प्राञ्चं | प्राञ्चौ | प्राचः |
| प्राचा | प्राग्भ्यां | प्राग्भिः |

इत्यादि जलमुक्छब्दवत्.

एवं पराङ्, अवाङ्—इत्यादयः.

चकारांतः पुल्लिंगः प्रत्यक्छब्दः—ಅತ್ಮನು

| | | |
|---|---|---|
| प्रत्यङ् | प्रत्यञ्चौ | प्रत्यञ्चः |
| प्रत्यञ्चं | प्रत्यञ्चौ | प्रतीचः |
| प्रतीचा | प्रत्यग्भ्यां | प्रत्यग्भिः |
| प्रतीचे | प्रत्यग्भ्यां | प्रत्यग्भ्यः |
| प्रतीचः | प्रत्यग्भ्यां | प्रत्यग्भ्यः |
| प्रतीचः | प्रतीचोः | प्रतीचां |
| प्रतीचि | प्रतीचोः | प्रत्यक्षु |

एवं सम्यङ्, न्यङ्, सध्र्यङ्, विश्वद्र्यङ्, देवद्र्यङ्, सर्वद्र्यङ्, अदद्र्यङ्—इत्यादयः

SGDF

### चकारांतः पुल्लिंगोऽन्वक्छब्दः—ಅನುಸರಿಸುವಂತಹ

| | | | |
|---|---|---|---|
| | अन्वङ् | अन्वञ्चौ | अन्वञ्चः |
| | अन्वञ्चं | अन्वञ्चौ | अनूचः |
| | अनूचा | अन्वग्भ्यां | अन्वग्भिः |
| ष. | अनूचः | अनूचोः | अनूचां |
| स. | अनूचि | अनूचोः | अन्वक्षु |

### चकारांतः पुल्लिंगः उदक्छब्दः—ಉತ್ತರದಿಕ್ಕಿನಲ್ಲಿರುವ

| | | | |
|---|---|---|---|
| | उदङ् | उदञ्चौ | उदञ्चः |
| | उदञ्चं | उदञ्चौ | उदीचः |
| | उदीचा | उदग्भां | उदग्भिः |
| ष. | उदिचः | उदीचोः | उदीचां |
| स. | उदीचि | उदीचोः | उदक्षु |

### चकारांतः पुल्लिंगस्तिर्यक्छब्दः—ಪಶ್ವಾದಿಗಳು

| | | | |
|---|---|---|---|
| | तिर्यङ् | तिर्यञ्चौ | तिर्यञ्चः |
| | तिर्यञ्चं | तिर्यञ्चौ | तिरश्चः |
| | तिरश्चा | तिर्यग्भ्यां | तिर्यग्भिः |
| ष. | तिरश्चः | तिरश्चोः | तिरश्चां |
| स. | तिरश्चि | तिरश्चोः | तिर्यक्षु |

पूजार्थकांचुधात्वंतत्वेतु.

| | | |
|---|---|---|
| द्वि. प्रांचं | प्रांचौ | प्रांचः |
| तृ. प्रांचा | प्राङ्भ्यां | प्राङ्भिः |
| ष. प्रांचः | प्रांचोः | प्रांचां |
| स. प्रांचि | प्रांचोः | प्राङ्क्षु |

इत्याद्यूह्यं

चकारांतः पुल्लिंगस्सुवृद् शब्दः—ಛೇದಕನು

| | | |
|---|---|---|
| सुवृद् | सुवृश्चौ | सुवृश्चः |
| सुवृश्चं | सुवृश्चौ | सुवृश्चः |
| सुवृश्चा | सुवृड्भ्यां | सुवृड्भिः |
| स. सुवृश्चि | सुवृश्चोः | सुवृट्सु |

छकारांतः पुल्लिंगः प्राद्छब्दः—ಪ್ರಶ್ನೆ ಮಾಡುವನು

| | | |
|---|---|---|
| प्राद् | प्राच्छौ | प्राच्छः |
| प्राच्छं | प्राच्छौ | प्राच्छः |
| प्राच्छा | प्राड्भ्यां | प्राड्भिः |
| स. प्राच्छि | प्राच्छोः | प्राट्सु |

SGDF

जकारांतः पुल्लिंगो राट्शब्दः—ರಾಜನು

| | | |
|---|---|---|
| राट् | राजौ | राजः |
| राजं | राजौ | राजः |
| राजा | राड्भ्यां | राड्भिः |
| ष. राजः | राजोः | राजां |
| स. राजि | राजोः | राट्सु |

एवं विश्वसृट्, देवेट्, इतीमे सृजमृजयजधातु निष्पन्नाः, परिव्राट्च.

जकारांतः पुल्लिंगो भृट्शब्दः—ಅಡಿಗೆಯವನು

| | | |
|---|---|---|
| भृट् | भृज्जौ | भृज्जः |
| भृज्जं | भृज्जौ | भृज्जः |
| भृज्जा | भृड्भ्यां | भृड्भिः |
| स. भृज्जि | भृज्जोः | भृट्सु |

जकारांतः पुल्लिंगो विभ्राट्शब्दः—ಪ್ರಕಾಶಿಸುವನು

| | | |
|---|---|---|
| विभ्राक्, विभ्राट् | विभ्राजौ | विभ्राजः |
| तृ. विभ्राजा | विभ्राग्भ्यां / विभ्राड्भ्यां | विभ्राग्भिः / विभ्राड्भिः |
| ष. विभ्राजः | विभ्राजोः | विभ्राजां |
| स. विभ्राजि | विभ्राजोः | विभ्राक्षु, वभ्राट्सु |

जकारांतः पुल्लिंगो युक्छब्दः—ಕೂಡಿಕೊಂಡಿರುವವನು

| | | |
|---|---|---|
| युङ् | युंजौ | युंजः |
| युंजं | युंजौ | युजः |

शेषं भिषक्छब्दवत्.

समाधात्रर्थको युक्छब्दो भिषक्छब्दवत्.

णकारांतः पुल्लिंगस्सुगणशब्दः—ಚೆನ್ನಾಗಿ ಲೆಕ್ಕಮಾಡತಕ್ಕವನು

| | | | |
|---|---|---|---|
| | सुगण् | सुगणौ | सुगणः |
| तृ. | सुगणा | सुगणभ्यां | सुगणभिः |
| स. | सुगणी | सुगणोः | सुगण्सु |

थकारान्तः पुल्लिंगोऽग्निमच्छब्दः—ಅಗ್ನಿಮಥನಮಾಡುವವನು

| | | | |
|---|---|---|---|
| | अग्निमत् | अग्निमथौ | अग्निमथः |
| तृ. | अग्निमथा | अग्निमद्भ्यां | अग्निमद्भिः |
| स. | अग्निमथि | अग्निमथोः | अग्निमत्सु |

धकारांतः पुल्लिंगो बुच्छब्दः—ತಿಳಿದವನು

| | | | |
|---|---|---|---|
| | बुत् | बुधौ | बुधः |
| तृ. | बुधा | बुद्भयां | बुद्भिः |
| | बुधे | बुद्भ्यां | बुद्भ्यः |
| | बुधः | बुद्भ्यां | बुद्भ्यः |
| | बुधः | बुधोः | बुधां |
| | बुधि | बुधोः | भुत्सु |

एवं मर्मवित्—इत्यादयः.

### नकारांतः पुल्लिंगः पूषन् शब्दः—ಸೂರ್ಯನು

| | | | |
|---|---|---|---|
| | पूषा | पूषणौ | पूषणः |
| | हे पूषन् | हे पूषणौ | हे पूषणः |
| | पूषणं | पूषणौ | पूष्णः |
| | पूष्णा | पूषभ्यां | पूषभिः |
| स. | पूष्णि, पूषणि | पूष्णोः | पूषसु |

एवं अर्यमा.

### नकारांतः पुल्लिंगो वृत्रहन् शब्दः—ಇಂದ್ರನು

| | | | |
|---|---|---|---|
| | वृत्रहा | वृत्रहणौ | वृत्रहणः |
| | हे वृत्रहन् | हे वृत्रहणौ | हे वृत्रहणः |
| | वृत्रहणं | वृत्रहणौ | वृत्रघ्नः |
| स. | वृत्रघ्नि, वृत्रहणि | वृत्रघ्नोः | वृत्रहसु |

एवं ब्रह्महा, भ्रूणहा, इत्यादयो हनधात्वन्ताः.

### नकारांतः पुल्लिंगश्श्वन् शब्दः—ನಾಯಿ

| | | |
|---|---|---|
| श्वा | श्वानौ | श्वानः |
| हे श्वन् | हे श्वानौ | हे श्वानः |
| श्वानं | श्वानौ | शुनः |
| शुना | श्वभ्यां | श्वभिः |
| शुने | श्वभ्यां | श्वभ्यः |
| शुनः | श्वभ्यां | श्वभ्यः |
| शुनः | शुनोः | शुनां |
| शुनि | शुनोः | श्वसु |

नकारांतः पुल्लिंगो युवन् शब्दः—ತರುಣನು

| | | |
|---|---|---|
| युवा | युवानौ | युवानः |
| हे युवन् | हे युवानौ | हे युवानः |
| युवानं | युवानौ | यूनः |
| यूना | युवभ्यां | युवभिः |
| यूने | युवभ्यां | युवभ्यः |
| यूनः | युवभ्यां | युवभ्यः |
| यूनः | यूनोः | यूनां |
| यूनि | यूनोः | युवसु |

नकारांतः पुल्लिंगो मघवच्छब्दः—ಇಂದ್ರನು

| | | |
|---|---|---|
| मघवा | मघवानौ | मघवानः |
| हे मघवन् | हे मघवानौ | हे मघवानः |
| मघवानं | मघवानौ | मघोनः |
| मघोना | मघवभ्यां | मघवभिः |
| मघोने | मघवभ्यां | मगवभ्यः |
| मघोनः | मघवभ्यां | मघवभ्यः |
| मघोनः | मघोनोः | मघोनां |
| मघोनि | मघोनोः | मघवसु |

अयं धीमद्वदपि.

मघवान् मघवंतौ मघवंतः—इत्यादि

नकारांतः पुल्लिंगः अर्वन् शब्दः—ಅಶ್ವ

| | | |
|---|---|---|
| अर्वा | अर्वंतौ | अर्वंतः |

शेषं धीमच्छब्द्वत्.

नकारांतः पुल्लिंगः पथिन् शब्दः—ಮಾರ್ಗ

| | | |
|---|---|---|
| पंथाः | पंथानौ | पंथानः |
| पंथानं | पंथानौ | पथः |
| पथा | पथिभ्यां | पथिभिः |
| पथे | पथिभ्यां | पथिभ्यः |
| पथः | पथिभ्यां | पथिभ्यः |
| पथः | पथोः | पथां |
| पथि | पथोः | पथिषु |

एवं मंथा—इत्यादयः.

नकारांतः पुल्लिंगः ऋभुक्षिन् शब्दः—ಇಂದ್ರನು

| | | |
|---|---|---|
| ऋभुक्षाः | ऋभुक्षाणौ | ऋभुक्षाणः |
| ऋभुक्षाणं | ऋभुक्षाणौ | ऋभुक्षः |
| ऋभुक्षा | ऋभुक्षिभ्यां | ऋभुक्षिभिः |
| स. ऋभुक्षि | ऋभुक्षोः | ऋभुक्षिषु |

नकारांतः पुल्लिंगः पञ्चन् शब्दः नित्यबहुवचनान्तः—ಐದುಜನ

पंच, पंच, पंचाभिः, पंचभ्यः, पंचभ्यः, पंचानां, पंचसु.

एवं, सप्त नव, दश.

नकारांतः पुल्लिंगोऽष्टशब्दो नित्यबहुवचनान्तः—ಎಂಟುಜನ

प्र. अष्टौ, अष्ट ; च. अष्टाभ्यः, अष्टभ्यः
द्वि. अष्टौ, अष्टः ; प. अष्टाभ्यः, अष्टभ्यः
तृ. अष्टाभिः, अष्टभिः ; ष. अष्टानां ; स. अष्टासु, अष्टसु.

रेफांतः पुल्लिंगश्चतुर्शब्दो नित्यबहुवचनान्तः—ನಾಲ್ಕುಜನ

चत्वारः, चतुरः, चतुर्भिः, चतुर्भ्यः, चतुर्भ्यः, चतुर्णां, चतुर्षु.

षकारांतः पुल्लिंगष्षट्छब्दो नित्यबहुवचनान्तः—ಆರುಜನ

षट्, षट्, षड्भिः, षड्भ्यः, षड्भ्यः, षण्णां, षट्सु

षकारांतः पुल्लिंगो दोश्शब्दः—ಬಾಹು

| | | |
|---|---|---|
| दोः | दोषौ | दोषः |
| तृ. दोषा | दोर्भ्यां | दोर्भिः |
| स. दोषि | दोषोः | दोष्षु |

एतदर्थको दोषन् शब्दो राजान् शब्दवत्.

SGDF

### सकारांतः पुल्लिंगः पुंस् शब्दः—ಪುರುಷನು

| | | | |
|---|---|---|---|
| प्रः | पुमान् | पुमांसौ | पुमांसः |
| | हे पुमन् | हे पुमांसौ | हे पुमांसः |
| द्वि. | पुमांसं | पुमांसौ | पुंसः |
| तृ. | पुंसा | पुंभ्यां | पुंभिः |
| ष. | पुंसः | पुंसोः | पुंसां |
| स. | पुंसि | पुंसोः | पुंस्सु |

### सकारांतः पुल्लिंग उशनश्शब्दः—ಶುಕ್ರನು

| | | | |
|---|---|---|---|
| प्र. | उशना | उशनसौ | उशनसः |
| सं. | हे उशन्<br>हे उशनः<br>हे उशन | हे उशनसौ | हे उशनसः |

शेषं वेधश्शब्दवत्.

### सकारांतः पुल्लिंगोऽनेहश्शब्दः—ಕಾಲವು

| | | | |
|---|---|---|---|
| प्र. | अनेहा | अनेहसौ | अनेहसः |
| सं. | हे अनेहः | हे अनेहसौ | हे अनेहसः |

शेषं वेधश्शब्दवत्. एवं पुरुदंसा.

### हकारांतः पुल्लिंगो दुक्छब्दः—ಕರೆಯುವವನು

| | | | |
|---|---|---|---|
| प्र. | दुक् | दुहौ | दुहः |
| तृ. | दुहा | धुग्भ्यां | धुग्भि |
| स. | दुहि | दुहोः | धुक्षु |

हकारांतः पुल्लिंगो विश्ववाट्छब्दः—ಇಂದ್ರನು

| | | | |
|---|---|---|---|
| | विश्ववाट् | विश्ववाहौ | विश्ववाहः |
| | विश्ववाहं | विश्ववाहौ | विश्वौहः |
| | विश्वौहा | विश्ववाड्भ्यां | विश्ववाड्भिः |
| ष. | विश्वौहः | विश्वौहोः | विश्वौहां |
| स. | विश्वौहि | विश्वौहोः | विश्ववाट्सु |

एवं राजवाट्—इत्यादयः.

हकारांतः पुल्लिंगस्तुराषाट्छब्दः—ಇಂದ್ರನು

| | | | |
|---|---|---|---|
| | तुराषाट् | तुरासाहौ | तुरासाहः |
| | तुरासाहं | तुरासाहौ | तुरासाहः |
| | तुरासाहा | तुराषाड्भ्यां | तुराषाड्भिः |
| ष. | तुरासाहः | तुरासाहोः | तुरासाहां |
| स. | तुरासाहि | तुरासाहोः | तुराषाट्सु |

हकारांतः पुल्लिंगोऽनडुच्छब्द—ವೃಷಭವು

| | | | |
|---|---|---|---|
| | अनड्वान् | अनड्वाहौ | अनड्वाहः |
| | हे अनड्वन् | हे अनड्वाहौ | हे अनड्वाहः |
| | अनड्वाहं | अनड्वाहौ | अनडुहः |
| | अनडुहा | अनडुद्भ्यां | अनडुद्भिः |
| ष. | अनडुहः | अनडुहोः | अनडुहां |
| स. | अनडुहि | अनडुहोः | अनडुत्सु |

SGDF

## अथ हलंतस्त्रीलिंग विशेषशब्दाः.

प्राची, प्रतीची, उदीची, अनूची, विष्मध्रीचि, देवद्रींची, सध्रिचा, तिरश्ची, इत्याकारा अवधात्वंता गौरीशब्दवद्रूपाणि लभंते. पंच, षट्, सप्त, अष्टौ, नव, दश, एते लिंगत्रयेऽपि सरूपाः.

पकारांतः स्त्रीलिंगोऽप्छब्दो नित्यबहुवचनान्तः—ನೀರು

आपः, अपः, अद्भिः, अद्भयः, अद्भयः, अपां, अप्सु.

रेफांतः स्त्रीलिंगश्चतुर्शब्दो नित्यबहुवचनांतः

चतस्रः, चतस्रः, चतसृभिः, चतसृभ्यः, चतसृभ्यः, चतसृणां, चतसृषु.

षकारांतः स्त्रीलिंगस्सजूश्शब्दः—ಕೂಡ ಹೊಂದಿದ

| | | | |
|---|---|---|---|
| | सजूः | सजुषौ | सजुषः |
| तृ. | सजुषा | सजूर्भ्यां | सजूर्भिः |
| सः | सजुषि | सजुषोः | सजूष्षु |

सकारांत स्त्रीलिंग आशीश्शब्दः—ಹಾರೈಕೆ

| | | | |
|---|---|---|---|
| प्र. | आशीः | आशिषौ | आशिषः |
| तृ. | आशिषा | आशीर्भ्यां | आशीर्भिः |
| स. | आशिषि | आशिषोः | आशीष्षु |

हकारांत स्त्रीलिंग उपानच्छब्दः-- ಪಾದುಕೆ

| | | |
|---|---|---|
| प्रः उपानत् | उपानहौ | उपानहः |
| तृ. उपानहा | उपानद्भ्यां | उपानद्भिः |
| स. उपानहि | उपानहोः | उपानत्सु |

उष्णिक्छन्दो धुक्छब्दवत्.

---

## अथ हलंत नपुंसकलिंग विशेषशब्दाः

प्राक्छब्दस्सुवाक्छब्दवत्. एवं परागादयः.

चकारांत नपुंसकलिंगः प्रत्यक्छब्दः.

| | | |
|---|---|---|
| प्रत्यक् | प्रतीची | प्रत्यंचि |

पुनस्तद्वत्; शेषं पुंवत्. एवं सम्यगादयः

चकारांतः नपुंसकलिंगोऽन्वक्छब्दः

| | | |
|---|---|---|
| अन्वक् | अनूचि | अन्वंचि |

पुनस्तद्वत्; शेषं पुंवत्.

चकारांत नपुंसकलिंगः उदक्छब्दः.

| | | |
|---|---|---|
| उदक् | उदीची | उदंचि |

पुनस्तद्वत्; शेषं पुंवत्.



SGDF

### चकारांत तपुंसकलिंगस्तिर्यक्छब्दः

| | | |
|---|---|---|
| तिर्यक् | तिरश्ची | तिर्यंचि |

पुनस्तद्वत्; शेषं पुंवत्. इत्याद्यूह्यं.

### नकारांत नपुंसकलिंगो अहन् शब्दः—ಹಗಲು

| | | |
|---|---|---|
| प्र. अहः | अह्नी, अहनी | अहानि |
| तृ. अह्ना | अहोभ्यां | अहोभिः |
| स. अह्नि, अहनि | अह्नोः | अहस्सु |

### रेफांत नपुंसकलिंगो वार्शब्दः—ನೀರು

| | | |
|---|---|---|
| प्र. वाः | वारी | वारि |
| तृ. वारा | वार्भ्यां | वार्भिः |
| स. वारि | वारोः | वार्षु |

### रेफांत नपुंसकलिंगश्चतुर्शब्दो नित्यबहुवचनान्तः

| | |
|---|---|
| चत्वारि | चत्वारि |

शेषं पुंवत्.

### सकारांत नपुंसकलिंगो धनुश्शब्दः—ಬಿಲ್ಲು

| | | |
|---|---|---|
| प्र. धनुः | धनुषी | धनूंषि |
| तृ. धनुषा | धनुर्भ्यां | धनुर्भिः |
| स. धनुषि | धनुषोः | धनुष्षु |

सकारांत नपुंसकलिंगश्शोचिश्शब्दः—ठ७०७

| | | |
|---|---|---|
| प्र. शोचिः | शोचिषी | शोचींषि |
| तृ. शोचिषा | शोचिर्भ्यां | शोचिर्भिः |
| स. शोचिषि | शोचिषोः | शोचीष्षु |

एवं रोचिः—इत्यादयः.

---

## अथ संधयः

सवर्णदीर्घश्च गुणो वृद्धिर्यण् चाप्ययादिकः ।
पररूपः पूर्वरूपः तथा प्रकृतिभावकः ॥
अष्टौ वै संधयः प्रोक्ताः स्वराणां संन्धिवेदिभिः ।
बालव्युत्पत्तिसिद्ध्यर्थं निरूप्यंते मयाऽत्र ते ॥
अकस्सवर्णेऽचि* परे संधिस्स्याद्दीर्घनामकः ।
आत्परेषु सदैव स्यादुकारेकारयोरपि ॥

---

*(1) अइउण् (2) ऋऌक् (3) एओङ् (4) ऐऔच् (5) हयवरट् (6) लण् (7) ञमङणनम् (8) झभञ् (9) घढधष् (10) जबगडदश् (11) खफछठथचटतव् (12) कपय् (13) शषसर् (14) हल् इति माहेश्वराणि सूत्राणि अणादि संज्ञार्थानि.

एतत्सूत्रांतवर्णसहितः अकारादिवर्णः मध्यगानां स्वस्य च संज्ञा भवति. संज्ञा यथा—अण् इति अ इ उ वर्णानां; अच् इति आ इ उ ऋ ऌ ए ओ ऐ औ वर्णानां; एच् इति ए ओ ऐ औ वर्णानां. एवं हल् झल् इत्यादयो ज्ञेयाः.

ऋकारे च बुधैर्ज्ञेयः संधिर्वै गुणनामकः ।
एकारैकारावोकारश्च तथाऽपि चौकारः ॥
आत्परतो यदि चैते संधिस्स्याद्वृद्धिनामाऽयम् ।
असवर्णे यदि च परे सर्वे त्विकस्स्याच्च यण् संधिः ॥
एचस्स्युर्यदि परतः स्वरास्तदानीमयादि संधिः स्यात् ।
अकारः परतः स्याच्चेत् एकरौकारयोरपि ॥
पदांतयोः पूर्वरूपसंधिस्स्याद्बुधसम्मतः ।
उपसर्गादकारांतात् धातावेङादिके परे ॥
पररूपं भवत्येव संधिस्स्यात्पररूपकः ।
प्लुतात्प्रगृह्याच्च परे स्वरे प्रकृतिभावकः ॥
एवं चैवाष्टधा प्रोक्ताः स्वराणां संधयो बुधैः ।

---

## वर्णानां स्थानानि.

कण्ठः—अ कवर्ग विसर्ग हकाराणां
तालु—इ चवर्ग यशानां
मूर्धा—ऋ टवर्ग रषाणां
दंता—लृ तवर्ग लसानां
ओष्ठौ—उ पवर्गोपध्मानीयानां
नासिका—अमङणनानां
कण्ठतालु—एकारैकारयोः
कण्ठोष्ठं—ओकारौकारयोः
दंतोष्ठं—वकारस्य

जिह्वामूलं—जिह्वामूलीयस्य
नासिका—अनुस्वारस्य

| | |
|---|---|
| उपध्मानीयः | पफाभ्यां प्रगर्धविसर्ग सदृशः ᳲ प् ᳲ फ् |
| जिह्वामूलीयः | कखाभ्यां प्रागर्धविसर्ग सदृशः ᳱ क् ᳱ ख् |

---

सवर्ण दीर्घसंधिः—सवर्णदीर्घः आ ई ऊ ॠ

अक्षर+अभ्यासः=अक्षराभ्यासः  कवि+ईश्वरः=कवीश्वरः
विष्णु+उत्सवः=विष्णूत्सवः  धातृ+ऋकारः=धातृकार

गुणसंधिः—गुणः अ ए ओ

कृष्ण+ऋद्धिः=कृष्णर्द्धिः  रमा+इति=रमेति
गंगा+उदकं=गंगोदकं

वृद्धिसंधिः—वृद्धिः आ ऐ औ.

प्रथमा+एकवचनं=प्रथमैकवचनं  इंद्रः+ऐश्वर्यं=इंद्रैश्वर्यं
गंगा+ओघः=गंगौघः  रमा+औत्कंठ्यं=रमौत्कंठ्यं

यण् संधिः—यण् य र ल व.

इति+अत्र=इत्यत्र  धातृ+अंशः=धात्रंशः
ऌ+आकृतिः=लाकृतिः  मधु+अरिः=मध्वरिः

SGDF
Sri Gangadharendra Saraswathi Foundation

आयादि संधिः—अय् आय् अव् आव्

हरे+आयाहि=हरयायाहि श्रीयै+आसक्तः=श्रियायासक्तः
गुरो+आगच्छ=गुरवागच्छ गुरौ+आगते=गुरावागते

पूर्वरूपसंधिः

हरे+अव=हरेव विष्णो+अव=विष्णोव

पररूपसंधिः

प्र+एजते=प्रेजते उप+ओषति=उपोषति

प्रकृतिभावसंधिः

गंगे+अमू=गंगे अमू
विष्णू+इमौ=विष्णू इमौ
अहो+ईशाः=अहो ईशाः
हरी+एतौ=हरी एतौ
अमू+आसाते=अमू आसाते
हे कृष्ण+आगच्छ= हे कृष्ण आगच्छ

श्चुत्वं—स्तोःश्चुनाश्चुः

सकार तवर्गयोः शकारेण चवर्गेण वा योगे शकार-चवर्गौ क्रमेण स्तः; न तु शकारात्परस्य तवर्गस्य.

रामस्+शेते=रामश्शेते रामस्+चिनोति=रामश्चिनोति
सत्+चित्=सच्चित् शार्ङ्गिन्+जय=शार्ङ्गिञ्जय
विश्+नः=विश्नः प्रश्+नः=प्रश्नः

ष्टुत्वं—ष्टोःष्टुनाष्टुः

सकारतवर्गयोः षकारटवर्गाभ्यां योगे क्रमेण षकार टवर्गौस्तः; न तु पदांतस्थात् टवर्गात्परयोः सकार तवर्गयोः, नचापि तवर्गस्य षकारे परे.

रामस्+षष्ठः=रामष्षष्ठः रामस्+टीकते=रामष्टीकते
तत्+टीका=तट्टीका पेष्+ता=पेष्टा
चक्रिन्+ढौकसे=चक्रिण्ढौकसे षट्+संतः=षट्संतः
षट्+ते=षट्ते सन्+षष्ठः=सन्षष्ठः

जश्त्वं—झलां जशोंते

पदांते झलां सवर्णजस्स्युः.

उ.—वाक्+ईशः=वागीशः

चर्त्वं—खरीच

खरी परे झलां स्थाने चरस्स्युः.

उ.—तद्+सरः=तत्सरः

परसवर्णः—तोर्लि

तवर्गाल्लकारे परे परसवर्णस्यात्.

उ.—तत्+लयः=तल्लयः

अनुस्वारः—मोऽनुस्वारः

मान्तस्य पदस्य अनुस्वारः स्यात् हलि परे
उ.—हरिम्+वंदे=हरिंवंदे

द्वितीयानुस्वारः—नश्चापदांतस्य झलि

अपदांतस्य मस्य नस्य च झलि परेऽनुस्वारस्स्यात्
उ.—यशान्+सि=यशांसि

द्वितीयपरसवर्णः—अनुस्वारस्य ययि परसवर्णः, वा पदांतस्य. अपदांतानुस्वारस्य ययि परे परसवर्णस्स्यात्, पदांतानुस्वारस्य तु विकल्पेन.

उ.—शां+तः=शान्तः; त्वं+करोषि=त्वङ्करोषि, त्वं करोषि.

धुडागमः—डस्सिधुट्

डकारांतात् परस्य सस्य धुड्वा स्यात्

उ.—षड्+संतः=षड्संतः; षड्संतः

ङमुडागमः—ङमो ह्रस्वादचि ङमुण्नित्यं

ह्रस्वात् परो यो ङम् तदंतं यत्पदं तस्मात्परस्य अचः पूर्वावयवो ङम् स्यात्.

प्रत्यङ्+आत्मा=प्रत्यङ्ङात्मा सुगुण्+ईशः=सुगुण्णीशः

सन्+अच्युतः=सन्नच्युतः

रुत्वं—ससजुषो रुः

पदांतस्य सस्य 'सजुष्' शब्दस्य च रेफः स्यात्.

उ.—रामस्=रामर्

विसर्गः—खरवसानयोर्विसर्जनीयः

पदांते विद्यमानस्य रेफस्य विसर्गस्स्यात् खरि परे, अवसानेच.

उ.—रामर्=रामः हरिर्+क्षुभ्यति=हरिः क्षुभ्यति

उत्वं—अतोरोरप्लुतादप्लुते, हशि च

अप्लुतात् अतः परस्य रोरुस्स्यात् अप्लुतेऽति हशि च.

उ.—शिवर्+अर्च्यः=शिव+उ+अर्च्यः=शिवोऽर्च्यः

शिवर्+वंद्यः=शिव+उ+वंद्यः=शिवो वंद्यः

लोपदीर्घौ—रोरि. ढ्रलोपे पूर्वस्य दीर्घोऽणः

रेफस्य लोपस्स्यात् रेफे परे, रेफलोपनिमित्त रेफे परतः, पूर्वस्याणः दीर्घस्स्यात्.

उ.—पुनर्+रमते=पुनारामते

सत्वं—विसर्जनीयस्य सः वा शरि

विसर्गस्य सकारस्स्यात् खरि परे, शरि परे तु विकल्पेन.

उ.—विष्णुः+त्राता=विष्णुस्त्राता

हरिः+शेते=हरिश्शेते, हरिः शेते

अविकृत विसर्गः—शर्परे विसर्जनीयः

विसर्गस्य शर्परकखरि परे विसर्ग एव.

उ.—कः+त्सरुः=कःत्सरुः

जिह्वामूलीयोपध्मानीयसंधिः-कप्वोः ᳵकᳶपौच कखयोः पफयोश्च परतः क्रमात् जिह्वामूलियोपध्मानीयौवा स्तः

उ.—वृक्षः+कुत्र=वृक्षᳵकुत्र कः+खनति=कᳵखनति

कः+पाकः=कᳶपाकः कः+फलति=कᳶफलति

लोपः—एतत्तदोस्सु लोपोऽकोरनञ्समासे हलि. अककारयोः एतत्तदोर्विसर्गस्य लोपस्स्यात् हलिपरे न तु नञ् समासे.

उ.—एषः+राजा=एषराजा    असः+शिवः=असश्शिवः

सः+राजा=सराजा

द्वितियलोपः—सोऽचिलोपे चेत्पादपूरणं

सः इत्यस्य विसर्गस्य लोपः स्यात् अचि परे लोपेनैव चेत् पादपूरणं.

उ.—सैष दाशरथी रामः

---

## समासाः.

प्रथमस्तत्पुरुषोऽयं द्वितीयः कर्मधारयः ।
तृतीयस्तु द्विगुः प्रोक्तो बहुव्रीहिस्तुरीयकः ॥
पंचमस्त्वव्ययीभावः षष्ठो द्वंद्व उदीरितः ।
समासष्षड्विधः प्रोक्तस्समासज्ञैर्मनीषिभिः ॥

### तत्पुरुषोऽष्टविधः

प्रथमा—पूर्वः+कायस्य=पूर्वकायः
द्वितीया—राज्यं+श्रितः=राज्याश्रितः
तृतीया—विद्यया+मान्यः=विद्यामान्यः
चतुर्थी—यूपाय+दारु=यूपदारु

पंचमी—चोरात्+भयं=चोरभयं

षष्ठी—राज्ञः+आज्ञा=राजाज्ञा

सप्तमी—दाने+शौंडः=दानशौंडः

नञ्—न+ब्राह्मणः=अब्राह्मणः

कर्मधारयस्सप्तविधः

विशेषण पूर्वपदः—रक्तश्चासौ+पटश्च=रक्तपटः

विशेष्य पूर्वपदः—वैयाकरणश्चासौ+खसूचिश्च=वैयाकरण खसूचिः

विशेषणोभयपदः—स्नातश्चासौ+अनुलिप्तश्च=स्नातानुलिप्तः

उपमानोत्तरपदः—पुरुषः+सिंह इव=पुरुषसिंहः

उपमान पूर्वपदः—इंदुरिव+धवळः=इंदुधवळः

संभावना पूर्वपदः—रसाल इति+तरुः=रसालतरुः

अवधारणा पूर्वपदः—विद्यैव+धनं=विद्याधनं

द्विगुर्द्विविधः

एकवद्भावी—पंचानां+वटानां+समाहारः=पंचवटी

अनेकवद्भावी—षण्णां+मातॄणां+अपत्यं पुमान्=षाण्मातुरः

बहुव्रीहिस्सप्तविधः

द्विपदः—पीतं+अंबरं+यस्य सः=पीतांबरः

बहुपदः—मनोहरं+पीतं+वसनं+यस्य सः=मनोहरपीतवसनः

एवं सर्वासु विभक्तिषु बोध्यः.

संख्योभयपदः—पंच वा+षड्वा=पंचषाः

संख्योत्तरपदः—दशानां+समीपे+ये+संति+ते=उपदशाः

सहपूर्वपदः—पुत्रेण+सह वर्तत इति=सपुत्रः

दिगंतराळलक्षणः—दक्षिणस्याश्च+पूर्वस्याश्च+दिशोर्यदंत-
राळं+सा=दक्षिणपूर्वा

व्यतिहारलक्षणः–दंडैश्च दंडैश्च+प्रहृत्य प्रवृत्तं युद्धं=दंडादंडि

अव्ययीभावसमासो द्विविधः.

अव्ययपूर्वपदः—कुंभस्य+समीपे=उपकुंभं

नामपदपूर्वपदः—शाकस्य+लेशः=शाकप्रति

द्वंद्वसमासश्चतुर्विधः.

द्विपदेतरेतरयोगः—रामश्च+लक्ष्मणश्च=रामलक्ष्मणौ

ब बहुपदेतरेतरयोगः—धर्मश्च+अर्थश्च+कामश्च+मोक्षश्च=
धर्मार्थकाममोक्षाः

द्विपदसमाहारः—सुखं च+दुःखं च+तयोस्समाहारः=
सुखदुःखं

बहुपदसमाहारः—ढक्काच+मृदंगश्च+पटहश्च+तेषां
समाहारः=ढक्कामृदंगपटहं

अलुक् समासः—परस्मै+पदं=परस्मैपदं

कृद्वृत्तिः—नम्रियंत इति=अमराः

तद्धितवृत्तिः—अदितेः+अपत्यानि+पुमांसः=आदितेयाः

सनाद्यंतधातुवृत्तिः—वैरं+आचरते=वैरायते

एकशेषवृत्तिः—रामश्च+रामश्च=रामौ
हंसीच+हंसश्च=हंसौ

समासमंजरी सेयं बालव्युत्पत्तिसिद्धये ।
रचिता सुचिरं जीयात् कृपया शार्ङ्गधन्वनः ॥

---

## धातुभेदकानि विकरणानि दशविधानि.

शब्विकरणं, लुग्विकरणं, श्लु विकरणं, श्यन्विकरणं, श्नुविकरणं, शविकरणं, श्नं विकरणं, उ विकरणं, श्ना विकरणं, णिज्विकरणं, इति.

लड्वर्तमाने लेड्वेदे भूते लुङ् लङ् लिटस्तथा।
विध्याशिषोस्तु लिङ् लोटौ लृङ् लृटौ लुड्भविष्यति ॥

भू सत्तायां. परस्मैपदी. शब्विकरणं.

### लट्.

| | | | |
|---|---|---|---|
| प्र. | भवति | भवतः | भवंति |
| म. | भवसि | भवथः | भवथ |
| उ. | भवामि | भवावः | भवामः |

### लिट्.

| | | | |
|---|---|---|---|
| प्र. | बभूव | बभूवतुः | बभूवुः |
| म. | बभूविथ | बभूवथुः | बभूव |
| उ. | बभूव | बभूविव | बभूविम |

### लुट्.

| | | | |
|---|---|---|---|
| प्र. | भविता | भवितारौ | भवितारः |
| म. | भवितासि | भवितास्थः | भवितास्थ |
| उ. | भवितास्मि | भवितास्वः | भवितास्मः |

SGDF

### लृट्.

| | | | |
|---|---|---|---|
| प्र. | भविष्यति | भविष्यतः | भविष्यंति |
| म. | भविष्यसि | भविष्यथः | भविष्यथ |
| उ. | भविष्यामि | भविष्यावः | भयिष्यामः |

### लोट्.

| | | | |
|---|---|---|---|
| प्र. | भवतु, भवतात् | भवतां | भवंतु |
| म. | भव, भवतात् | भवतं | भवत |
| उ. | भवानि | भवाव | भवाम |

### लङ्.

| | | | |
|---|---|---|---|
| प्र. | अभवत् | अभवतां | अभवन् |
| म. | अभवः | अभवतं | अभवत |
| उ. | अभवं | अभवाव | अभवाम |

### विधिलिङ्.

| | | | |
|---|---|---|---|
| प्र. | भवेत् | भवेतां | भवेयुः |
| म. | भवेः | भवेतं | भवेत |
| उ. | भवेयं | भवेव | भवेम |

### आशीर्लिङ्.

| | | | |
|---|---|---|---|
| प्र. | भूयात् | भूयास्तां | भूयासुः |
| म. | भूयाः | भूयास्तं | भूयास्त |
| उ. | भूयासं | भूयास्व | भूयास्म |

लङ्.

| | | | |
|---|---|---|---|
| प्र. | अभूत् | अभूतां | अभूवन् |
| म. | अभूः | अभूतं | अभूत |
| उ. | अभूवं | अभूव | अभूम |

लृङ्.

| | | | |
|---|---|---|---|
| प्र. | अभविष्यत् | अभविष्यतां | अभविष्यन् |
| म. | अभविष्यः | अभविष्यतं | अभविष्यत |
| उ. | अभविष्यं | अभविष्याव | अभविष्याम |

अद् भक्षणे. परस्मैपदी. लुग्विकरणं.

लट्.

| | | | |
|---|---|---|---|
| प्र. | अत्ति | अत्तः | अदंति |
| म. | अत्सि | अत्थः | अत्थ |
| उ. | अद्मि | अद्वः | अद्मः |

लिट्

| | | | |
|---|---|---|---|
| प्र. | जघास | जक्षतुः | जक्षुः |
| म. | जघसिथ | जक्षथुः | जक्षुः |
| उ. | जघास, जघस | जक्षिव | जक्षिम |

लुट्.

| | | | |
|---|---|---|---|
| प्र. | अत्ता | अत्तारौ | अत्तारः |
| म. | अत्तासि | अत्तास्थः | अत्तास्थ |
| उ. | अत्तास्मि | अत्तास्वः | अत्तास्मः |

SGDP

## लृट्.

| | | | |
|---|---|---|---|
| प्र. | अत्स्यति | अत्स्यतः | अत्स्यंति |
| म. | अत्स्यसि | अत्स्यथः | अत्स्यथ |
| उ. | अत्स्यामि | अत्स्यावः | अत्स्यामः |

## लोट्.

| | | | |
|---|---|---|---|
| प्र. | अत्तु, अत्तात् | अत्तां | अदंतु |
| म. | अद्धि, अत्तात् | अत्तं | अत्त |
| उ. | अदानि | अदाव | अदाम |

## लङ्.

| | | | |
|---|---|---|---|
| प्र. | आदत् | आत्तां | आदन् |
| म. | आदः | आत्तं | आत्त |
| उ. | आदं | आद्व | आद्म |

## विधिलिङ्.

| | | | |
|---|---|---|---|
| प्र. | अद्यात् | अद्यातां | अद्युः |
| म. | अद्याः | अद्यातं | अद्यात |
| उ. | अद्यां | अद्याव | अद्याम |

## आशीर्लिङ्.

| | | | |
|---|---|---|---|
| प्र. | अद्यात् | अद्यास्तां | अद्यासुः |
| म. | अद्याः | अद्यास्तं | अद्यास्त |
| उ. | अद्यासं | अद्यास्व | अद्यास्म |

लुङ्.

| | | |
|---|---|---|
| प्र. अघसत् | अघसतां | अघसन् |
| म. अघसः | अघसतं | अघसत |
| उ. अघसं | अघसाव | अघसाम |

लृङ्.

| | | |
|---|---|---|
| प्र. आत्स्यत् | आत्स्यतां | आत्स्यन् |
| म. आत्स्यः | आत्स्यतं | आत्स्यत |
| उ. आत्स्यं | आत्स्याव | आत्स्याम |

---

हु दानादनयोः. परस्मैपदी. श्लुविकरणं.

लट्.

| | | |
|---|---|---|
| प्र. जुहोति | जुहुतः | जुह्वति |
| म. जुहोषि | जुहुथः | जुहुथ |
| उ. जुहोमि | जुहुवः | जुहुमः |

लिट्.

| | | |
|---|---|---|
| प्र. जुहाव | जुहुवतुः | जुहुवुः |
| म. जुहोथ, जुहविथ | जुहुवथुः | जुहुव |
| उ. जुहाव, जुहव | जुहुविव | जुहुविम |

लुट्.

| | | |
|---|---|---|
| प्र. होता | होतारौ | होतारः |
| म. होतासि | होतास्थः | होतास्थ |
| उ. होतास्मि | होतास्वः | होतास्मः |

लृट्.

| | | | |
|---|---|---|---|
| प्र. | होष्यति | होष्यतः | होष्यंति |
| म. | होष्यसि | होष्यथः | होष्यथ |
| उ. | होष्यामि | होष्यावः | होष्यामः |

लोट्.

| | | | |
|---|---|---|---|
| प्र. | जुहोतु, जुहुतात् | जुहुतां | जुह्वतु |
| म. | जुहुधि, जुहुतात् | जुहुतं | जुहुत |
| उ. | जुहवानि | जुहवाव | जुहवाम |

लङ्.

| | | | |
|---|---|---|---|
| प्र. | अजुहोत् | अजुहुतां | अजुहवुः |
| म. | अजुहोः | अजुहुतं | अजुहुत |
| उ. | अजुहवं | अजुहुव | अजुहुम |

विधिलिङ्.

| | | | |
|---|---|---|---|
| प्र. | जुहुयात् | जुहुयातां | जुहुयुः |
| म. | जुहुयाः | जुहुयातं | जुहुयात |
| उ. | जुहुयां | जुहुयाव | जुहुयाम |

आशीर्लिङ्.

| | | | |
|---|---|---|---|
| प्र. | हूयात् | हूयास्तां | हूयासुः |
| म. | हूयाः | हूयास्तं | हूयास्त |
| उ. | हूयासं | हूयास्व | हूयास्म |

लुङ्.

| | | |
|---|---|---|
| प्र. अहौषीत् | अहौष्टां | अहौषुः |
| मः अहौषीः | अहौष्टं | अहौष्ट |
| उ. अहौषं | अहौष्व | अहौष्म |

लृङ्.

| | | |
|---|---|---|
| प्र. अहोष्यत् | अहोष्यतां | अहोष्यन् |
| म. अहोष्यः | अहोष्यतं | अहोष्यत |
| उ. अहाष्यं | अहोष्याव | अहोष्याम |

---

एध वृद्धौ. आत्मनेपदी.

लट्.

| | | |
|---|---|---|
| प्र. एधते | एधेते | एधंते |
| म. एधसे | एधेथे | एधध्वे |
| उ. एधे | एधावहे | एधामहे |

लिट्.

| | | |
|---|---|---|
| प्र. एधांचक्रे | एधांचक्राते | एधांचक्रिरे |
| म. एधांचकृषे | एधांचक्राथे | एधांचकृढ्वे |
| उ. एधांचक्रे | एधांचकृवहे | एधांचकृमहे |

लुट्.

| | | |
|---|---|---|
| प्र. एधिता | एधितारौ | एधितारः |
| म. एधितासे | एधितासाथे | एधिताध्वे |
| उ. एधिताहे | एधितास्वहे | एधितास्महे |

### लृट्.

| | | |
|---|---|---|
| प्र. एधिष्यते | एधिष्येते | एधिष्यंते |
| म. एधिष्यसे | एधिष्येथे | एधिष्यध्वे |
| उ. एधिष्ये | एधिष्यावहे | एधिष्यामहे |

### लोट्.

| | | |
|---|---|---|
| प्र. एधतां | एधेतां | एधंतां |
| म. एधस्व | एधेथां | एद्ध्वं |
| उ. एधै | एधावहै | एधामहै |

### लङ्.

| | | |
|---|---|---|
| प्र. ऐधत | ऐधेतां | ऐधंत |
| म. ऐधथाः | ऐधेथां | ऐधध्वं |
| उ. ऐधे | ऐधावहि | ऐधामहि |

### विधिलिङ्.

| | | |
|---|---|---|
| प्र. एधेत | एधेयातां | एधेरन् |
| म. एधेथाः | एधेयाथां | एधेध्वं |
| उ. एधेय | एधेवहि | एधेमहि |

### आशिषिलिङ्.

| | | |
|---|---|---|
| प्र. एधिषीष्ट | एधिषीयास्तां | एधिषीरन् |
| म. एधिषीष्ठाः | एधिषीयास्थां | एधिषीध्वं |
| उ. एधिषीय | एधिषीवहि | एधिषीमहि |

लुङ्.

| | | | |
|---|---|---|---|
| प्र. | ऐधिष्ट | ऐधिषातां | ऐधिषत |
| म. | ऐधिष्ठाः | ऐधिषाथां | ऐधिध्वं |
| उ. | ऐधिषि | ऐधिष्वहि | ऐधिष्महि |

लृङ्

| | | | |
|---|---|---|---|
| प्र. | ऐधिष्यत | ऐधिष्येतां | ऐधिष्यंत |
| म. | ऐधिष्यथाः | ऐधिष्येथां | ऐधिष्यध्वं |
| उ. | ऐधिष्ये | ऐधिष्यावहि | ऐधिष्यामहि |

---

आस उपवेशने. आत्मनेपदी.

लट्.

| | | | |
|---|---|---|---|
| प्र. | आस्ते | आसाते | आसते |
| म. | आस्से | आसाथे | आध्वे |
| उ. | आसे | आस्वहे | आस्महे |

लिट्.

| | | | |
|---|---|---|---|
| प्र. | आसांचक्रे | आसांचक्राते | आसांचक्रिरे |
| म. | असांचकृषे | आसांचक्राथे | असांचकृढ्वे |
| उ. | आसांचक्रे | आसांचकृवहे | आसांचकृमहे |

लुट्.

| | | | |
|---|---|---|---|
| प्र. | आसिता | आसितारौ | आसितारः |
| म. | आसितासे | आसितासाथे | आसिताध्वे |
| उ. | आसिताहे | आसितास्वहे | आसितास्महे |

लृट्.

| | | | |
|---|---|---|---|
| प्र. | आसिष्यते | आसिष्येते | आसिष्यंते |
| म. | आसिष्यसे | आसिष्येथे | आसिष्यध्वे |
| उ. | आसिष्ये | आसिष्यावहे | आसिष्यामहे |

लोट्.

| | | | |
|---|---|---|---|
| प्र. | आस्तां | आसातां | आसतां |
| म. | आस्स्व | आसाथां | आध्वं |
| उ. | आसै | आसावहै | आसामहै |

लङ्

| | | | |
|---|---|---|---|
| प्र. | आस्त | आसातां | आसत |
| म. | आस्थाः | आसाथां | आध्वं |
| उ. | आसि | आस्वहि | आस्महि |

विधिलिङ्.

| | | | |
|---|---|---|---|
| प्र. | आसीत | आसीयातां | आसीरन् |
| म. | आसीथाः | आसियाथां | आसीध्वं |
| उ. | आसीय | आसीवहि | आसीमहि |

आशीर्लिङ्.

| | | | |
|---|---|---|---|
| प्र. | आसिषीष्टं | आसिषीयास्तां | आसिषीरन् |
| म. | आसिषीष्ठाः | आसिषीयास्थां | आसिषीध्वं |
| उ. | आसिषीय | आसिषीवहि | आसिषीमहि |

लुङ्.

| | | |
|---|---|---|
| प्र. आसिष्ट | आसिषातां | आसिषत |
| म. आसिष्ठाः | आसिषाथां | आसिध्वं |
| उ. आसिषि | आसिष्वहि | आसिष्महि |

लृङ्.

| | | |
|---|---|---|
| प्र. आसिष्यत | आसिष्येतां | आसिष्यंत |
| म. आसिष्यथाः | आसिष्येथां | आसिष्यध्वं |
| उ. आसिष्ये | आसिष्यावहि | आसिष्यामहि |

ओ हाङ् गतौ. अत्मनेपदी.

लट्.

| | | |
|---|---|---|
| प्र. जिहीते | जिहाते | जिहते |
| म. जिहीषे | जिहाथे | जिहीध्वे |
| उ. जिहे | जिहीवहे | जिहीमहे |

लिट्.

| | | |
|---|---|---|
| प्र. जहे | जहाते | जहिरे |
| म. जहिषे | जहाथे | जहीध्वे(ढ्वे) |
| उ. जहे | जहिवहे | जहिमहे |

लुट्.

| | | |
|---|---|---|
| प्र. हाता | हातारौ | हातारः |
| म. हातासे | हातासाथे | हाताध्वे |
| उ. हाताहे | हातास्वहे | हातास्महे |

लृट्.

| | | |
|---|---|---|
| प्र. हास्यते | हास्येते | हास्यंते |
| म. हास्यसे | हास्येथे | हास्यध्वे |
| उ. हास्ये | हास्यावहे | हास्यामहे |

लोट्.

| | | |
|---|---|---|
| प्र. जिहीतां | जिहातां | जिहतां |
| म. जिहीष्व | जिहाथां | जिहीध्वं |
| उ. जिहै | जिहावहै | जिहामहै |

लङ्.

| | | |
|---|---|---|
| प्र. अजिहीत | अजिहातां | अजिहत |
| म. अजिहीथाः | अजिहाथां | अजिहीध्वं |
| उ. अजिहि | अजिहीवहि | अजिहीमहि |

विधिलिङ्.

| | | |
|---|---|---|
| प्र. जिहीत | जिहीयातां | जिहीरन् |
| म. जिहीथाः | जिहीयाथां | जिहीध्वं |
| उ. जिहीय | जिहीवहि | जिहीमहि |

आशीर्लिङ्.

| | | |
|---|---|---|
| प्र. हासीष्ट | हासीयास्तां | हासीरन् |
| म. हासीष्ठाः | हासीयास्थां | हासीध्वं |
| उ. हासीय | हासीवहि | हासीमहि |

लुङ्.

| | | | |
|---|---|---|---|
| प्र. | अहास्त | अहासातां | अहासत |
| म. | अहास्थाः | अहासाथां | अहाध्वं |
| उ. | अहासि | अहास्वहि | अहास्महि |

लृङ्.

| | | | |
|---|---|---|---|
| प्र. | अहास्यत | अहास्येतां | अहास्यंत |
| म. | अहास्यथाः | अहास्येथां | अहास्यध्वं |
| उ. | अहास्ये | अहास्यावहि | अहास्यामहि |

---

## अथाव्ययानि.

सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययं ॥

विभक्तिप्रतिरूपकाणि.

अस्ति अस्मि आह आस.

अव्ययीभावाव्ययानि.

उपकुंभं, प्रतिपुरुषमित्यादीनि

कृदंतानि

तुमुन्—गंतुं, यातुं
ल्यप्—विलोक्य, विहस्य
क्त्वा—गत्वा, दृष्ट्वा
णमुल्—स्मारंस्मारं, पायं पायं

## तद्धितान्तानि.

आं—नितरां, सुतरां
वतिः—सूर्यवत्, चंद्रवत्
तसिल्—अतः, यतः
त्रल्—अत्र, यत्र
हांतं—इह, कुह
अद्वंतं—क्व
दांतं—तदा, यदा
र्हि—तर्हि, यर्हि
अधुना—अधुना
दानीमंतं—इदानीं, तदानीं
द्यसंतं—सद्यः
आरि—परारि
एद्यवि—परेद्यवि
एद्युस्—पूर्वेद्युः
थमुः—इत्थं
असिः—पुरः, अधः
अस्तातिलुक्—प्राक्
रिष्टातिल्—उपरिष्टात्
एनप्—उत्तरेण, अधरेण
आहि—दक्षिणाहि
थमुस्—कथं

कृत्वसुच्—पञ्चकृत्वं
सुच्लुक्  सकृत्
तसिः—आदितः
सातिः—अग्निसात्
उत्—परुत्
समसण्—ऐषमः
द्य—अद्य
थाल्—यथा, तथा
अस्तातिः—पुरस्तात्
अतसुच्—दक्षिणतः
रिल्—उपरि
आतिः—उत्तरात्, अधरात्
आच्—दक्षिणा, उत्तरा
धा—एकधा
एधाच्—द्वेधा
सुच्—द्विः, त्रिः
शस्—बहुशः
च्विः—कृष्णीभवति
त्रा—देवत्रा
डाच्—पटपटाकरोति.

इत्यव्ययानि.

## अथोपसर्गाः.

प्र, परा, अप, सं, अनु, अव, निस्, निर्. दुस्, दुर्, वि, आङ्, नि, अधि, अपि, सु उत्, अभि, प्रति, परि, उप.

---

## प्रयोगाः

रामो विराजते—अकर्मक कर्तरिप्रयोगः

रामो भूमंडलमपालयत्—सकर्मक कर्तरिप्रयोगः

रामचंद्रो दशग्रीवं परलोकमनीनयत्--द्विकर्मक कर्तरि प्रयोगः

रामेणोपार्जिता कीर्तिः—कर्मणि प्रयोगः

रामचंद्रेण भूयते—भावे प्रयोगः

रामेण कुंभकर्णस्तु प्रापितस्त्रिदशालयं—द्विकर्मक कर्मणि प्रयोगः.

---